# मुक्तस्वाध्यायपीठम्

(Institute of Distance Education)

Rashtriya Sanskrit Sansthan

(Deemed University)

नवदेहली

## शास्त्रिप्रवेशपरीक्षा

# आदर्शप्रश्नपत्रम्

# (Model Paper)

समयः – होरात्रयम् पूर्णाङ्काः – 150+50

परीक्षार्थिनाम ..........................................................................

अनुक्रमाङ्कः ..........................................................................

परीक्षाकेन्द्रनाम ..........................................................................

परीक्षार्थिनः हस्ताक्षरम् ..........................................................................

निरीक्षकस्य हस्ताक्षरम् ..........................................................................

निर्देशाः

- प्रवेशपरीक्षाप्रश्नपत्रे द्वौ भागौ भवतः । उभावपि भागौ तिसृषु घण्टासु समाधेयौ । परीक्षा पूर्वाह्ने एकादशवादनतः अपराह्ने द्विवादनं यावद् भवति ।
- **प्रथमभागे लघूत्तरीयप्रश्नाः भवन्ति ।**
- यथानिर्देशं सर्वान् प्रश्नान् समाधत्त ।
- ***द्वितीयभागे व्याकरणस्य, ज्यौतिषस्य, साहित्यस्य च प्रश्नाः भवन्ति / ततः स्वाभिलषितस्य कस्यचिदेकस्य शास्त्रस्य सम्बद्धाः प्रश्नाः समाधेयाः /***
- **द्वयोरपि भागयोः आहत्य १०० अङ्काः परीक्षोत्तीर्णतायै भवद्भिः प्राप्तव्याः ।**

## भागः – क (150 अङ्कानाम्) संस्कृतभाषाज्ञानपरीक्षणम्

**I विभक्तिवचने निर्दिशत** 02 x 02 = 04

१. हरिणा
२. मतयः

**II प्रातिपदिकं, लिङ्गं च निर्दिशत** 02 x 03 = 06

१. विद्वान्
२. अमुष्य
३. आत्मनः

**III प्रदत्तपदम् उपयुज्य वाक्यं रचयत** 02 x 05 = 10

१. वर्धते
२. पठनीयम्
३. गीतवान्
४. दृष्टवती
५. पचति

**IV सन्धत्त** 02 x 02 = 04

१. सूर्य + उदयः .................................

२. प्रति + एकम् ...................................

**V सन्धिविच्छेदं कुरुत** 02 x 02 = 04

१. मुनेर्वचनम्: .................... + ......................

२. रमेशः .................... + ......................

**VI कोष्ठके दत्तशब्दस्य उचितविभक्तिम् उपयुज्य वाक्यं पूरयत** 02 x 02 = 04

१. बालकः ........................ बिभेति । (सिंहः)

२. अहं ............................ सस्यानि सिञ्चामि । (जलम्)

**VII उदाहरणानुगुणं वर्णान् पृथक् कुर्वन्तु (पण्डितः = प्+अ+ण्+ड्+इ+त्+अः)** 02 x 02 = 04

१. तक्षकः = ..............................................................................

२. मण्डूकः = ..............................................................................

**VIII अङ्कानां कृते पदानि लिखत** 02 x 02 = 04

१. 16 ………………………………….

२. 91 ………………………………….

**IX त्त्वा/ल्यप्-प्रत्ययं प्रयोज्य वाक्यम् एकीकुरुत** 02x 05 = 10

१. रामः रावणं हन्ति । अयोध्याम् आजगाम । ………………

२. अहं पत्रं विलिखामि। मित्राय प्रेषयामि । ………………

३. राधा देवस्य पुरतः तिष्थति। प्रार्थयति । ………………

४. अहं देशभक्तिगीतं श्रृणोमि। नन्दामि । ………………

५. सः पठित्वा विद्वान् भवति । ………………

**X रिक्तस्थानेषु विशेषणस्य/विशेष्यस्य शुद्धं रूपं लिखत** 02 x 02 =04

१. अहं …………………. (चतुरः) ………………………………… (छात्रः) सह गच्छामि।

२. बालकः …………………. (उन्नता) ………………………………… (उत्पीटिका) अवतरति।

**XI प्रयोगं (वाच्यं) परिवर्तयत** 02 x 04 =08

१. अम्बा पुत्रं पश्यति । ……………………………………………………

२. अलसः दिने सुप्तवान् । ……………………………………………………

३. दिवाकरः गुरून् प्रणमति । ……………………………………………………

४. अहं उज्जयिनीं गच्छामि । ……………………………………………………

५. मया फलानि नीयन्ते । ……………………………………………………

**XII स्त्रीप्रत्ययं योजयित्वा स्त्रीवाचकरूपं लिखत** 02 x 02 = 04

१. पुत्रः - ……………………………………………………………..

२. अन्तिमः - ……………………………………………………………..

**XIII प्रदत्तानुच्छेदात् कानिचन पञ्च अव्ययानि चिनुत** 05 x 01 = 05

त्वं यदा विद्यालयं गच्छसि तदा अध्यापक: पाठयति । विद्यां विना संसारे किमपि न लभ्यते । यावत् विद्या पठ्यते तावत् बालकस्य जीवनं सुखमयं भवति । विद्यां प्राप्य मानवा: गृहात् बहि: अपि गच्छन्ति । तत्र विदेशेषु भारतीयानां महान् आदर: भवति । धन्यं खलु विद्याधनं यत् सूर्य इव प्रकाशते ।

.................

**XIV समस्तपदं लिखत** 02 x 02 = 04

१. रघो: वंश: ……………..................

२. त्रयाणां लोकानां समाहार: ……………..................

**XV शुद्धं वाक्यं लिखत** 02 x 02 = 04

१. सीता रामस्य सह वनं वनम् अगच्छत् । ……………………………………………

२. माता पुत्रं फलानि ददाति । ……………………………………………

**XVI संस्कृतभाषया अनुवादं कुरुत** 02 x 02 = 04

१. You should study well (तुम अच्छा पढो)

……………………………………………

२. Try to speak in Sanskrit (संस्कृत बोलने का प्रयास करो)

……………………………………………

**XVII हिन्दीभाषया आङ्ग्लभाषया वा अनुवादं कुरुत** 02 x 02 = 04

१. श्व: शालायां परीक्षा भविष्यति । ……………………………………………

२. दिवा सूर्य: रात्रौ चन्द्र: च शोभते । ……………………………………………

**XVIII कमप्येकं विषयम् अवलम्ब्य पत्रं लिखत** 05 x 01 = 05

पुस्तकप्रेषणाय प्रकाशकं प्रति पत्रं लिखत

**अथवा**

विद्यालयपरिवर्तनात् विद्यालयत्यागस्य प्रार्थनापत्रम् ।

**XIX कमप्येकं विषयम् अवलम्ब्य निबन्धं लिखत** 08 x 01 = 08

अहिंसा परमो धर्मः

**अथवा**

स्वच्छभारताभियानम्

**XX एकवाक्येन उत्तरं लिखत** 02 x 25 = 50

1. स्वप्नवासवदत्ते कति पुरुषपात्राणि सन्ति ?
2. यौगन्धरायणः कस्य महामन्त्री वर्तते ?
3. लावणकग्रामे अधीयमानछात्रस्य नाम किम् ?
4. पद्मावत्याः भ्रातुः नाम किम् ?
5. स्वप्नवासवदत्ते कति पात्राणि विद्यन्ते ?
6. अधर्मावसितं भारस्य कः/का वदति ?
7. स्वप्नवासवदत्ते ब्रह्मचारिणः आश्रमप्रवेशे कः समयः आसीत् ?
8. यौगन्धरायणः किमर्थम् अग्नौ पतितः ?
9. स्वप्नवासवदत्ते विदूषकस्य नाम किम् ?
10. स्वप्नवासवदत्ते "आर्यपुत्रोऽपि नाम परकीयः संवृत्तः" इति का कथयति ?
11. दुर्योधनः सेवकान् कथं पश्यति ?
12. दुर्योधनस्य राज्ये सर्वे जनाः कथं सन्ति ?
13. सेवकेभ्यः वितीर्णाः सम्पदः कां प्रकाशयन्ति ?
14. मन्युः कथं ज्वलति ?
15. "वरं विरोधोऽपि समं महात्मभिः" इति वाक्यं कस्मिन् काव्ये अस्ति ?
16. किरातार्जुनीयस्य कस्मिन् सर्गे सामदानभेददण्डोपायानां प्रयोगकौशलं वर्णितमस्ति ?

17. निष्फलकोपस्य कीदृशी स्थितिर्भवति ?

18. "हितं मनोहारि च दुर्लभं वचः" इति कस्मिन् काव्ये अस्ति ?

19. किरातार्जुनीयस्य कस्मिन् सर्गे वनेचरस्य कथनं लभ्यते ?

20. कस्य प्रमादेन राज्यं नष्टं जातमिति द्रौपदी वदति ?

21. नगणस्य स्वरूपम् किम् ?

22. "हंसी" छन्दसि कति वर्णाः भवन्ति ?

23. विद्युन्मालायाः लक्षणं किम् ?

24. शिखरिणी छन्दसः उदाहरणं लिखतु ।

25. इन्द्रवज्रायां प्रतिचरणं कति वर्णाः भवन्ति ?

## ख - खण्डः

## कस्यचित् एकस्य अभिलषितशास्त्रस्य प्रश्नानां उत्तराणि लिखत ।

### व्याकरणम्

**I पञ्चविंशतिप्रश्नानाम् उत्तरं लिखत ।** 02 x 25 = 50

1. लण् सूत्रे अकारः कीदृशः ?
2. "तुल्यास्य प्रयत्नं सवर्णम्" इति सूत्रेण किं विधीयते ?
3. प्रत्याहारसंज्ञाविधायकं सूत्रं किम् ?
4. बाह्यप्रयत्नाः के ?
5. टवर्गस्य स्थानं किम् ?
6. "इको यणचि" इत्यस्य सूत्रस्य अर्थः कः ?
7. हरी एतौ इत्यत्र सन्धिः कः ?
8. श्चुत्वसन्धिविधायकं सूत्रं किम् ?
9. वाग्घरिः इति कस्य सूत्रोदाहरणम् ?
10. "ढ्रलोपे पूर्वस्य दीर्घोऽणः" सूत्रोदाहरणं किम् ?
11. "रो रि" इति सूत्रेण किं विधीयते ?
12. प्रातिपदिकसंज्ञाविधायकं सूत्रद्वयं लिखत ।

13. रामेषु इत्यत्र षत्वं केन ?

14. सर्वस्मै इत्यत्र स्मैभावः केन ?

15. सुडागमविधायकं सूत्रं किम् ?

16. नपुंसकलिङ्गे जश्शसोः शीभावः केन ?

17. अष्टन् शब्दस्य जश्शसोः औशादेशविधायकं सूत्रं किम् ?

18. ङे प्रथमयोरम् सूत्रार्थः कः ?

19. “नहो धः” सूत्रार्थः कः ?

20. हे ब्रह्मन् इत्यत्र नलोपः कुतः न ?

21. लेट् लकारः कुत्र भवति ?

22. लोट्लकारस्य अर्थः कः ?

23. एधाम्बभूव इति कस्मिन् लकारे रूपम् ?

24. धातोः अडागमः केषु लकारेषु भवति ?

25. धातुगणाः कति सन्ति ?

## फलितज्यौतिषम्

**I पञ्चविंशतिप्रश्नानाम् उत्तरं लिखत ।** 02 x 25 = 50

1. कति ग्रहाः सन्ति ?

2. इदानीं कः संवत्सरः ।

3. एकस्मिन् पक्षे कति दिनानि सन्ति ।

4. एकस्मिन् चान्द्रमासे कति तिथयः भवन्ति ।

5. जातकनिर्माणार्थं प्रधानतया किम् अपेक्षते ।

6. एकस्मिन् नक्षत्रे कति चरणाः भवन्ति ।

7. कृत्तिकानक्षत्रस्य संख्या का (कृत्तिकानक्षत्रं कतमम) ?

8. अश्विनीनक्षत्रM कस्मिन् राशौ तिष्ठति ?

9. मङ्गळग्रहस्य पर्यायपदं लिखत ।

10. मन्दः इति कस्य ग्रहस्य नाम ... ।

11. कः ग्रहः अत्यन्तमन्देन गच्छति ।

12. ग्रहनायकः इति कः विख्यातः ।

13. (-3) + (-4) = ?

14. या + 25 = 55 – अत्र या = ?

15. (+5) x (-4) = ?

16. (-8) ÷ (-4) = ?

17. □या = 25 अत्र या = ?

18. तृतीयः सौरमासः कः ?

19. पञ्चमः चान्द्रमासः कः ?

20. पञ्चाङ्गानि कानि ?

21. या = 5, या$^{3}$ = ?

22. (मध्यान्हे एकवादनम्) 1 pm = 13 o clock, 10:30 pm = ?

23. प्राचीनभारतस्य प्रसिद्धः गणितज्ञः कः ?

24. -25 X 0 = ?

25. 02 X 02 = 04, या X या = ?

## साहित्यम्

**I पञ्चविंशतिप्रश्नानाम् उत्तरं लिखत । 02 x 25 = 50**

1. रामायणस्य रचयिता कः ?
2. कर्णभारः केन विरचितः ?
3. किरातार्जुनीयस्य कः प्रणेता ?
4. रघुवंशमहाकाव्यं कः लिखितवान् ?

5. दशकुमारचरितस्य कर्ता कः ?

6. किरातार्जुनीये सर्गाः कति सन्ति ?

7. श्रीमद्रामायणे नायकः कः ?

8. पदलालित्यम् प्रधानतया कस्य कवेः गुणः ? माघस्य – उत दण्डिनः – उत कालिदासस्य ?

9. रघुवंशमहाकाव्ये नायकमेकं सूचयितुं शक्यते वा ? (सूचयत)

10. कालिदासः कस्य अलङ्कारस्य प्रयोगे प्रसिद्धाः ?

11. स्वप्नवासवदत्ते नायिका का ?

12. भासेन लिखितानि रूपकाणि कति ?

13. स्वप्नवासवदत्तं कीदृशं काव्यम् ? दृश्यम् उत श्रव्यम् ?

14. कर्णभारे नायकः कः ?

15. द्रष्टुं योग्यं काव्यं किमुच्यते ?

16. अनुष्टुप् श्लोके कति पादाः भवन्ति ?

17. नगणे कति लघु-अक्षराणि भवन्ति ?

18. मन्दाक्रान्ताऽम्बुधिरसनगर्भो भनौ तौ गयुग्मम् इति कस्य वृत्तस्य लक्षणम् ?

19. बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते – अत्र गुरु-लघु- अक्षराणि कानि ?

20. वैदिकलोकिकभेदेन छन्दः कतिविधम् ?

21. केवलं श्रोतुं योग्यं काव्यं किमुच्यते ?

22. उपरूपकाणि कति सन्ति ? अष्टादश – उत दश ?

23. खण्डकाव्यस्य उदाहरणं किम् ? मेघदूतम् उत रघुवंशम् ?

24. कति काव्यप्रयोजनानि सन्ति ? षट् उत चत्वारि ?

25. काव्यस्य सर्वप्रधानं प्रयोजनं किम् ? आनन्दप्राप्तिः – उत उपदेशः ?